श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु
यादवाभ्युदये महाकाव्ये

# ॥ प्रथमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ प्रथमः सर्गः ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

वन्दे बृन्दावनचरं वल्लवीजनवल्लभम्।
जयन्तीसम्भवं धाम वैजयन्तीविभूषणम् ॥ **1.1** ॥

यदेकैकगुणप्रान्ते श्रान्ता निगमवन्दिनः।
यथावद्वर्णने तस्य किमुतान्ये मितम्पचाः ॥ **1.2** ॥

शक्त्या शौरिकथास्वादः स्थाने मन्दधियामपि।
अमृतं यदि लभ्येत किं न गृह्येत मानवैः ॥ **1.3** ॥

वसुधाश्रोत्रजे तस्मिन् व्यासे च हृदयस्थिते।
अन्येऽपि कवयः कामं बभूवुरनपत्रपाः ॥ **1.4** ॥

स कविः कथ्यते स्रष्टा रमते यत्र भारती।
रसभावगुणीभूतैरलङ्कारैर्गुणोदयैः ॥ **1.5** ॥

तदात्वे नूतनं सर्वमायत्यां च पुरातनम्।
न दोषायैतदुभयं न गुणाय च कल्पते ॥ **1.6** ॥

प्रवृत्तामनघे मार्गे प्रमाद्यन्तीमपि क्वचित्।
न वाचमवमन्यन्ते नर्तकीमिव भावुकाः ॥ **1.7** ॥

विहाय तदहं व्रीडां व्यासवेदार्णवामृतम्।
वक्ष्ये विबुधजीवातुं वसुदेवसुतोदयम् ॥ **1.8** ॥

क्रीडातूलिकया स्वस्मिन् कृपारूषितया स्वयम्।
एको विश्वमिदं चित्रं विभुः श्रीमानजीजनत्॥ **1.9** ॥

जगदाह्लादनो जज्ञे मनसस्तस्य चन्द्रमाः।
परिपालयितव्येषु प्रसाद इव मूर्तिमान्॥ **1.10** ॥

यदपत्यसमुद्भूतः पुण्यकीर्तिः पुरूरवाः।
सतामाहितवह्नीनां विहारस्थेयतां ययौ॥ **1.11** ॥

समवर्धत तद्वंशः उपर्युपरि पर्वभिः।
यशोमुक्ताफलैर्यस्य दिशो दश विभूषिताः॥ **1.12** ॥

बभूव नहुषस्तस्मिन् ऐरावत इवाम्बुधौ।
यमिन्द्रविगमे देवाः पदे तस्य न्यवीविशन्॥ **1.13** ॥

नरेन्द्राः पृथिवीचक्रे नामचिह्नैरलङ्कृताः।
जङ्गमास्तस्य वीरस्य जयस्तम्भा इवाभवन्॥ **1.14** ॥

शक्तिरप्रतिघा तस्य शात्रवैरपि तुष्टुवे।
यथावत् साधकस्येव यावदर्था सरस्वती॥ **1.15** ॥

वीरो रस इवोत्साहान्नहुषादभ्यजायत।
ययातिर्नाम येनैन्द्रमर्धासनमधिष्ठितम्॥ **1.16** ॥

विशालविपुलोत्तुङ्गे यद्बाहुशिखरान्तरे।
आसीद्वीरश्रिया सार्धं भूमिरर्धासने स्थिता॥ **1.17** ॥

निदेशं तस्य राजानो न शेकुरतिवर्तितुम्।
प्राप्तस्वपरनिर्वाहं प्रमाणमिव वादिनः॥ **1.18** ॥

तटाकमिव तापार्तास्तमिन्द्रमिव निर्जराः।
भावा इव रसं भव्याः पार्थिवाः पर्युपासत॥ **1.19** ॥

यदुर्नाम ततो जज्ञे यत्सन्ततिसमुद्भवैः।
समानगणनालेख्ये निस्समानैर्निषद्यते॥ **1.20** ॥

देहीति वदतां प्रायः प्रसीदन् प्रत्युवाच सः।
ललितध्वनिभिर्लक्ष्मीलीलाकमलषट्पदैः॥ **1.21** ॥

स च वृत्तविहीनस्य न विद्यां बह्वमन्यत।
न हि शुद्धेति गृह्येत चतुर्थीचन्द्रचन्द्रिका॥ **1.22** ॥

अपुनः प्रार्थनीयस्य प्रार्थिताधिकदायिनः।
अर्थिनः प्रथमे तस्य चरमान् पर्यपूरयन्॥ **1.23** ॥

शराणां शात्रवाणां च सन्धानेन महौजसः।
तस्य निर्धूतलक्षेण द्विः क्वचिन्नाप्यभूयत॥ **1.24** ॥

युक्तदण्डममित्राणां कृतान्तं समवर्तिनम्।
दक्षिणं लोकपालं तममन्यन्त दिवौकसः॥ **1.25** ॥

यशः प्रसूनसुरभिः यदुसन्तानपादपः।
बभूव विबुधप्रीत्यै बहुशाखः क्षमातले॥ **1.26** ॥

वंशे समभवत् तस्य वसुदेवः क्षितीश्वरः।
जनकः प्राग्भवे योऽभूत् देवदानवयूथयोः॥ **1.27** ॥

आनकानाञ्च दिव्यानां दुन्दुभीनाञ्च निस्वनैः।
सह जातं यमाचख्युराख्ययाऽऽनकदुन्दुभिम्॥ **1.28** ॥

तेन निर्मलसत्त्वेन विनिवृत्तरजस्तमाः।
जगती शान्तमोहेव धर्मोच्छ्वासवती बभौ॥ **1.29** ॥

स विष्णुरिव लोकानां तपनस्तेजसामिव।
समुद्र इव रत्नानां सतामेकाश्रयोऽभवत्॥ **1.30** ॥

प्रख्यातविभवे पत्न्यौ तस्य पूर्वं प्रजापतेः।
रोहिणी देवकीरूपे मनुष्यत्वे बभूवतुः॥ **1.31** ॥

अक्षुद्रगतिशालिन्योः तयोरन्योन्यसक्तयोः।
ऐकरस्यमभूत् पत्या गङ्गायमुनयोरिव॥ **1.32** ॥

स ताभ्यामनुरूपाभ्यां समतुष्यत् समेयिवान्।
व्यक्तिहेतुरभूद्येन सपर्यङ्कस्य शार्ङ्गिणः॥ **1.33** ॥

अलिप्सत न साम्राज्यं सोऽर्थकामपराङ्मुखः।
यदृच्छागतमैश्वर्यमानृण्यरुचिरन्वभूत्॥ **1.34** ॥

कयाचिदशरीरिण्या वाचा व्यवसितायतिः।
देवकीं वसुदेवञ्च कंसः कारामयोजयत्॥ **1.35** ॥

स कालातिबलः कंसः कालनेमिरनेहसा।
सर्वं दैतेयसत्त्वानां समाहार इवोदितः॥ **1.36** ॥

एतस्मिन्नन्तरे देवी मेरुमध्यमुपेयुषः।
प्रजापतिमुखान् देवान् प्राह सागरमेखला॥ **1.37** ॥

विदितं भवतां देवाः! विश्वरूपेण विष्णुना।
महीयान् धर्मशीलेषु भारो यत्तन्निवेशितः॥ **1.38** ॥

अधर्मनिघ्नैरधुना धर्मसेतुविभेदकैः।
असङ्ख्यैरद्भुतैस्तुङ्गैः क्रम्ये राक्षसपर्वतैः॥ **1.39** ॥

अत आलोचितजगद्धितैः सुरगणैः स्वयम्।
न पतामि न भिद्ये च यथाऽहं क्रियतां तथा॥ **1.40** ॥

इति ते भूतधारिण्या निसृष्टार्था दिवौकसः।
अविदुस्तत्प्रियस्यैव तद्भारहरणं क्षमम्॥ **1.41** ॥

पुरस्कृत्य जगद्धात्रीं मनसोऽपि पुरस्सराः।
दुग्धोदधिशयं देवं दूरमेत्याभितुष्टुवुः ॥ **1.42** ॥

त्रिवेदीमध्यदीप्ताय त्रिधाम्ने पञ्चहेतये।
वरदाय नमस्तुभ्यं बाह्यन्तर हविर्भुजे ॥ **1.43** ॥

अनन्याधीनमहिमा स्वाधीनपरवैभवः।
दयाधीनविहारस्त्वं प्रणतान् परिपाहि नः ॥ **1.44** ॥

स भवान् गुणरत्नौघैर्दीप्यमानो दयाम्बुधिः।
तनोति व्यूहविभवैः तरङ्गैरिव ताण्डवम् ॥ **1.45** ॥

त्वदेकव्यञ्जितैरादौ त्वदन्येष्वनिदम्परैः।
निगमैरनिगम्यं त्वां कः परिच्छेत्तुमर्हति ॥ **1.46** ॥

अमितस्य महिम्नस्ते प्रयातुं पारमिच्छताम्।
वितथा वेदपान्थानां यत्र सायङ्गृहा गतिः ॥ **1.47** ॥

नम्यस्य नमतः क्षुद्रान् वरदस्य वरार्थिनः।
पुत्रैः पितृमतः क्रीडा कथं ते केन वर्ण्यते ॥ **1.48** ॥

नटवद् भूमिकाभेदैर्नाथ दीव्यन् पृथग्विधैः।
पुंसामनन्यभावानां पुष्णासि रसमद्भुतम् ॥ **1.49** ॥

ब्रह्मादिस्तम्बपर्यन्तविचित्राङ्कुरशालिनाम्।
सलिलं कर्मकन्दानां क्रीडैव तव केवलम् ॥ **1.50** ॥

निराधारनिजस्थेम्नो निरुपाधिकशेषिणः।
निरपेक्षनियन्तुस्ते निस्समाभ्यधिका गुणाः ॥ **1.51** ॥

अनाविलधियामन्तश्चिन्तामणिरिव स्फुरन्।
दिशस्यभिमतं सर्वमतिरस्कार्यदीधितिः ॥ **1.52** ॥

संसारमरुकान्तारे परिश्रान्तस्य देहिनः।
त्वद्भक्त्यमृतवाहिन्यामादिष्टमवगाहनम्॥ **1.53** ॥

दुरितोदन्वदावर्ते घूर्णमानस्य दुःख्यतः।
समग्रगुणसम्पन्नः तारकस्त्वं प्लवो महान्॥ **1.54** ॥

अपरिच्छिद्यमानस्य देशकालादिभिस्तव।
निदर्शनं त्वमेवैकः त्वदन्यद्व्यतिरेकतः॥ **1.55** ॥

अकर्तुमखिलं कर्तुमन्यथाकर्तुमप्यलम्।
सङ्कल्पसचिवः काले शक्तिलेशः स तावकः॥ **1.56** ॥

यन्मूलमखिलं कार्यं यदमूलमधीमहे।
लक्ष्यं तदसि योगानां लक्ष्मीकौस्तुभलक्षणम्॥ **1.57** ॥

त्रिवर्गमपवर्गं वा प्रतिलब्धुं प्रयस्यताम्।
प्रलयेष्वपि दीर्घायुः प्रतिभूस्त्वदनुग्रहः॥ **1.58** ॥

यदेकमक्षरं ब्रह्म सर्वाम्नायसमन्वितम्।
तारकं सर्वजन्तूनां तत् त्वं तव च वाचकम्॥ **1.59** ॥

त्वदालम्बितहस्तानां भवादुन्मज्जतां सताम्।
मज्जतः पापजातस्य नास्ति हस्तावलम्बनम्॥ **1.60** ॥

अनन्यरक्षाव्रतिनं चातकव्रतचारिणः।
भवन्तमवलम्बन्ते निरालम्बनभावनम्॥ **1.61** ॥

अनिदम्पूर्वनिद्राणामनस्तमयभानुमान्।
आपादयसि पुंसां त्वमपुनस्स्वापजागरम्॥ **1.62** ॥

त्वदेकशरणानां त्वं शरणागतजीवनः।
विपदं नः क्षिप क्षिप्रं तमिस्रामिव भास्करः॥ **1.63** ॥

सति सूर्ये समुद्यन्तः प्रतिसूर्या इवासुराः।
जगद्बाधाय जायन्ते जहि तान् स्वेन तेजसा॥ **1.64** ॥

स दैत्यहत्यामिच्छद्भिः सुरैरेवमभिष्टुतः।
अनन्यदृश्यः सहसा दयया दर्शनं ददौ॥ **1.65** ॥

ततस्तं ददृशुर्देवाः शेषपर्यङ्कमास्थितम्।
अधिरूढशरन्मेघमन्यादृशमिवाम्बुदम्॥ **1.66** ॥

पत्न्या सह निषेदुष्या पद्मलक्षणलक्ष्यया।
स्वेच्छयैव शरीरिण्या सूचितैश्वर्यसम्पदम्॥ **1.67** ॥

सुकुमारसुखस्पर्शसुगन्धिभिरलङ्कृतम्।
स्वविग्रहगुणारामप्रसूनैरिव भूषणैः॥ **1.68** ॥

आरञ्जित जगन्नेत्रैरन्योन्य परिकर्मितैः।
अङ्गैरमितसौन्दर्यैरनुकल्पितभूषणम्॥ **1.69** ॥

उत्तेजितजयोत्साहमायुधैरनघोद्यमैः।
शौर्यविक्रमशक्त्याद्यैः सहजैः स्वगुणैरिव॥ **1.70** ॥

स्वकान्तिजलधेरन्तस्सिद्धसंहननं स्वतः।
महिम्ना जातवैचित्र्यं महानीलमिवोदितम्॥ **1.71** ॥

श्रुतिरूपेण वाहेन शेषकङ्कणशोभिना।
स्वाङ्घ्रिसौरभदिग्धेन दत्तसङ्ग्रामदोहलम्॥ **1.72** ॥

स्ववेत्रस्पन्द निःस्पन्दनेतव्येन निवेदितम्।
भक्तिनम्रेण सेनान्या प्रतिशृण्वन्तमिङ्गितैः॥ **1.73** ॥

अनपायं तमादित्यमक्षयं तारकाधिपम्।
अपारममृताम्भोधिममन्यन्त दिवौकसः॥ **1.74** ॥

अभयोदारहस्ताग्रमनघस्वागतस्मितम्।
अवेक्ष्य विबुधा देवमलभन्त दृशोः फलम्॥ **1.75**॥

तस्मै विज्ञापयामासुः विदितार्थाय नाकिनः।
निहताशेषदैत्याय निदानं स्वागतेः पुनः॥ **1.76**॥

त इमे क्षत्रिया भूत्वा क्षोभयन्ति क्षमामिमाम्।
तव तेजसि यैर्नाथ दनुजैश्शलभायितम्॥ **1.77**॥

चतुर्णां पुरुषार्थानां प्रसवो यत्समाश्रयात्।
हव्यकव्यप्रसूरेषा दीर्यते दैत्यभारतः॥ **1.78**॥

जाता निखिलवेदानामुत्तमाङ्गोपधानतः।
त्वत्पादकमलादेषा त्वदेकाधीनधारणा॥ **1.79**॥

यदि न त्वरते नाथ ! भारव्यपनये भवान्।
प्लावयिष्यन्त्युदन्वन्तः पृथिवीं पृथुवीचयः॥ **1.80**॥

करुणाधीनचित्तेन कर्णधारवती त्वया।
माऽवसीदतु पृथ्वीयं महती नौरिवाम्भसि॥ **1.81**॥

रशनारत्नरूपेण पयोधिरशना त्वया।
प्रशान्त दनुजक्लेशा परिष्करणमर्हति॥ **1.82**॥

कंसप्रभृतिभिः सेयं शल्यैरिव समुद्धृतैः।
चिरं भवतु ते पृथ्वी शेषमूर्तेः शिखण्डकः॥ **1.83**॥

प्रबोध सुभगैः स्मेरैः प्रसन्नैः शीतलैश्च नः।
कटाक्षैः प्लावय क्षिप्रं कृपैकोदन्वदूर्मिभिः॥ **1.84**॥

त्वयि न्यस्तभराणां नः त्वमेतां क्षन्तुमर्हसि।
विदिताशेषवेद्यस्य विज्ञापनविडम्बनाम्॥ **1.85**॥

इत्थं वदति देवानां समाजे वेधसा सह।
ववन्दे पृथिवी देवं विनतत्राण दीक्षितम्॥ **1.86** ॥

तनुमध्या विशालाक्षी तन्वी पीनपयोधरा।
मायेव महती तस्य वनितारत्नरूपिणी॥ **1.87** ॥

आबद्धमण्डलैर्भृङ्गैरलकामोदमोहितैः।
अयत्नलब्धां बिभ्राणा मायूरच्छत्रसम्पदम्॥ **1.88** ॥

प्रियसन्दर्शनानन्दजनितैरश्रुबिन्दुभिः।
न्यस्तमौक्तिकनैपथ्यैः परिष्कृतपयोधरा॥ **1.89** ॥

प्रस्फुरन्तं प्रियस्येव परिरम्भाभिलाषिणम्।
दक्षिणादितरं बाहुं दक्षिणा बह्वमन्यत॥ **1.90** ॥

विपदञ्च जगादैषा विपञ्चीमधुरस्वना।
विलक्षस्मितसम्भिन्नमौक्तिकाधरविद्रुमा॥ **1.91** ॥

अथ तान् भव्यया वाचा भगवान् प्रत्यभाषत।
प्रतिश्रुत्प्राप्तनिर्ह्लाद पाञ्चजन्याभिनन्द्यया॥ **1.92** ॥

माभैषुरसुरानीकात् भवन्तो मदुपाश्रयाः।
मदाज्ञामनवज्ञातुः परिभूत्या न भूयते॥ **1.93** ॥

अवतार्य भुवो भारमवतारो ममामराः।
अनादिनिधनं धर्ममक्षतं स्थापयिष्यति॥ **1.94** ॥

यावदिष्टभुजो यावदधिकारमवस्थिताः।
परिपालयत स्वानि पदानि विगतापदः॥ **1.95** ॥

दमनाद्दनुजेन्द्राणां द्रक्ष्यथ त्रिदशाधिपाः।
भूयोऽपि लघुतां प्राप्तां भुवमुल्लाघितामिव॥ **1.96** ॥

दैतेयमृगसङ्घाते मृगयारसभागिभिः।
भवद्भिरपि मेदिन्यां भवितव्यं नराधिपैः॥ **1.97** ॥

इतिताननघादेशः समादिश्य जनार्दनः।
अवधीरितदुग्धाब्धिः मथुरायां मनो दधे॥ **1.98** ॥

आश्वास्य वागमृतवृष्टिभिरादितेयान्
दैतेयभारनमितां पृथिवीं च देवीम्।
प्रादुर्बुभूषुरनघो वसुदेवपत्न्यां
पद्मापतिः प्रणिदधे समयं दयायाः॥ **1.99** ॥

साधूनां स्वपदसरोज षट्पदानां
धर्मस्य स्थितिमनघां विधातुकामः।
यद्गर्भे जगदखिलं स एव गर्भो
देवक्याः समजनि देवदेववन्द्यः॥ **1.100** ॥

॥ इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु
यादवाभ्युदये महाकाव्ये प्रथमः सर्गः॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥